# શ્રીનરસિંહસ્તુતિઃપ્રહ્લાદ

Shri Narasimhastutihprahlada

sanskritdocuments.org

May 13, 2018

# Shri Narasimhastutihprahlada

# શ્રીનરસિંહસ્તુતિઃપ્રહ્લાદ

## Sanskrit Document Information

Text title : narasiMhastutiHprahlAda

File name : narasiMhastutiHprahlAda.itx

Category : vishhnu, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 13, 2018

*sanskritdocuments.org*

# શ્રીનરસિંહસ્તુતિઃપ્રહ્લાદ

(પ્રહ્લાદકૃતા - શ્રીમદ્ભાગવતતઃ)

પ્રહ્લાદ ઉવાચ -

બ્રહ્માદયઃ સુરગણા મુનયોઽથ સિદ્ધાઃ
સત્ત્વૈકતાનમતયો વચસાં પ્રવાહૈઃ ।
નારાધિતું પુરુગણૈરધુનાપિ પિપ્રુઃ
કિં તોષ્ટુમર્હતિ સ મે હરિરુગ્રજાતેઃ ॥ ૧॥

મન્યે ધનાભિજનરૂપતપઃશ્રુતૌજ-
સ્તેજઃપ્રભાવબલપૌરુષબુદ્ધિયોગાઃ ।
નારાધનાય હિ ભવન્તિ પરસ્ય પુંસો
ભક્ત્યા તુતોષ ભગવાન્ગજયૂથપાય ॥ ૨॥

વિપ્રાદ્દ્વિષડ્ગુણયુતાદરવિન્દનાભ-
પાદારવિન્દવિમુખાત્ શ્વપચં વરિષ્ઠમ્ ।
મન્યે તદર્પિતમનોવચનેહિતાર્થ-
પ્રાણં પુનાતિ સ કુલં ન તુ ભૂરિમાનઃ ॥ ૩॥

નૈવાત્મનઃ પ્રભુરયં નિજલાભપૂર્ણો
માનં જનાદવિદુષઃ કરુણો વૃણીતે ।
યદ્યજ્જનો ભગવતે વિદધીત માનં
તચ્ચાત્મને પ્રતિમુખસ્ય યથા મુખશ્રીઃ ॥ ૪॥

તસ્માદહં વિગતવિક્લવ ઈશ્વરસ્ય
સર્વાત્મના મહિ ગૃણામિ યથામનીષમ્ ।
નીચોઽજયા ગુણવિસર્ગમનુપ્રવિષ્ટઃ
પૂયેત યેન હિ પુમાનનુવર્ણિતેન ॥ ૫॥

સર્વે હ્યમી વિધિકરાસ્તવ સત્ત્વધામ્નો
બ્રહ્માદયો વયમિવેશ ન ચોદ્વિજન્તઃ ।

ક્ષેમાય ભૂતય ઉતાત્મસુખાય ચાસ્ય
વિક્રીડિતં ભગવતો રુચિરાવતારૈઃ ॥ ૬॥

તદ્યચ્છ મન્યુમસુરશ્ચ હતસ્ત્વયાદ્ય
મોદેત સાધુરપિ વૃશ્ચિકસર્પહત્ત્યા ।
લોકાશ્ચ નિર્વૃતિમિતાઃ પ્રતિયન્તિ સર્વે
રૂપં નૃસિંહ વિભયાય જનાઃ સ્મરન્તિ ॥ ૭॥

નાહં બિભેમ્યજિત તેઽતિભયાનકાસ્ય-
જિહ્વાર્કનેત્રભ્રુકુટીરભસોગ્રદંષ્ટ્રાત્ ।
આન્ત્રસ્રજઃ ક્ષતજકેસરશઙ્કુકર્ણા-
ન્નિર્હ્રાદભીતદિગિભાદરિભિન્નખાગ્રાત્ ॥ ૮॥

ત્રસ્તોઽસ્મ્યહં કૃપણવત્સલ દુઃસહોગ્ર-
સંસારચક્રકદનાદ્ગ્રસતાં પ્રણીતઃ ।
બદ્ધઃ સ્વકર્મભિરુશત્તમ તેઽઙ્ઘ્રિમૂલં
પ્રીતોઽપવર્ગશરણં હ્વયસે કદા નુ ॥ ૯॥

યસ્માત્પ્રિયાપ્રિયવિયોગસયોગજન્મ-
શોકાગ્નિના સકલયોનિષુ દહ્યમાનઃ ।
દુઃખૌષધં તદપિ દુઃખમતદ્ધિયાઽહં
ભૂમન્ભ્રમામિ વદ મે તવ દાસ્યયોગમ્ ॥ ૧૦॥

સોઽહં પ્રિયસ્ય સુહૃદઃ પરદેવતાયા
લીલાકથાસ્તવ નૃસિંહ વિરિઞ્ચગીતાઃ ।
અઞ્જસ્તિતર્મ્યનુગૃણન્ગુણવિપ્રમુક્તો
દુર્ગાણિ તે પદયુગાલયહંસસઙ્ગઃ ॥ ૧૧॥

બાલસ્ય નેહ શરણં પિતરૌ નૃસિંહ
નાર્તસ્ય ચાગદમુદન્વતિ મજ્જતો નૌઃ ।
તપ્તસ્ય તત્પ્રતિવિધિર્ય ઇહાઞ્જસેષ્ટ-
સ્તાવદ્વિભો તનુભૃતાં ત્વદુપેક્ષિતાનામ્ ॥ ૧૨॥

યસ્મિન્યતો યર્હિ યેન ચ યસ્ય યસ્માદ્-
યસ્મૈ યથા યદુત યસ્ત્વપરઃ પરો વા ।
ભાવઃ કરોતિ વિકરોતિ પૃથક્સ્વભાવઃ
સઞ્ચોદિતસ્તદખિલં ભવતઃ સ્વરૂપમ્ ॥ ૧૩॥

માયા મનઃ સૃજતિ કર્મમયં બલીયઃ
કાલેન ચોદિતગુણાનુમતેન પુંસઃ ।
છન્દોમયં યદજયાર્પિતષોડશારં
સંસારચક્રમજ કોઽતિતરેત્ત્વદન્યઃ ॥ ૧૪॥

સ ત્વં હિ નિત્યવિજિતાત્મગુણઃ સ્વધામ્ના
કાલો વશીકૃતવિસૃજ્યવિસર્ગશક્તિઃ ।
ચક્રે વિસૃષ્ટમજયેશ્વર ષોડશારે
નિષ્પીડ્યમાનમુપકર્ષ વિભો પ્રપન્નમ્ ॥ ૧૫॥

દૃષ્ટા મયા દિવિ વિભોઽખિલધિષ્ણ્યપાના-
માયુઃ શ્રિયો વિભવ ઇચ્છતિ યાઞ્જનોઽયમ્ ।
યેઽસ્મત્પિતુઃ કુપિતહાસવિજૃમ્ભિતભ્રૂ-
વિસ્ફૂર્જિતેન લુલિતાઃ સ તુ તે નિરસ્તઃ ॥ ૧૬॥

તસ્માદમૂસ્તનુભૃતામહમાશિષો જ્ઞ
આયુઃ શ્રિયં વિભવમૈન્દ્રિયમા વિરિઞ્ચાત્ ।
નેચ્છામિ તે વિલુલિતાનુરુવિક્રમેણ
કાલાત્મનોપનય માં નિજભૃત્યપાર્શ્વમ્ ॥ ૧૭॥

કુત્રાશિષઃ શ્રુતિસુખા મૃગતૃષ્ણિરૂપાઃ
ક્વેદં કલેવરમશેષરુજાં વિરોહઃ ।
નિર્વિદ્યતે ન તુ જનો યદપીતિ વિદ્વાન્
કામાનલં મધુલવૈઃ શમયન્દુરાપૈઃ ॥ ૧૮॥

ક્વાહં રજઃપ્રભવ ઈશ તમોઽધિકેઽસ્મિન્
જાતઃ સુરેતરકુલે ક્વ તવાનુકમ્પા ।
ન બ્રહ્મણો ન તુ ભવસ્ય ન વૈ રમાયા
યન્મેઽર્પિતઃ શિરસિ પદ્મકરઃ પ્રસાદઃ ॥ ૧૯॥

નૈષા પરાવરમતિર્ભવતો નનુ સ્યા-
જ્જન્તોર્યથાઽઽત્મસુહૃદો જગતસ્તથાપિ ।
સંસેવયા સુરતરોરિવ તે પ્રસાદઃ
સેવાનુરૂપમુદયો ન પરાવરત્વમ્ ॥ ૨૦॥

એવં જનં નિપતિતં પ્રભવાહિકૂપે

કામાભિકામમનુ યઃ પ્રપતન્પ્રસઙ્ગાત્ ।
કૃત્વાઽઽત્મસાત્સુરર્ષિણા ભગવન્ ગૃહીતઃ
સોઽયં કથં નુ વિસૃજે તવ ભૃત્યસેવામ્ ॥ ૨૧॥

મત્પ્રાણરક્ષણમનન્ત પિતુર્વધશ્ચ
મન્યે સ્વભૃત્યઋષિવાક્યમૃતં વિધાતુમ્ ।
ખડ્ગં પ્રગૃહ્ય યદવોચદસદ્વિધિત્સુ-
સ્ત્વામીશ્વરો મદપરોઽવતુ કં હરામિ ॥ ૨૨॥

એકસ્ત્વમેવ જગદેતદમુષ્ય યત્ત્વ-
માદ્યન્તયોઃ પૃથગવસ્યસિ મધ્યતશ્ચ ।
સૃષ્ટ્વા ગુણવ્યતિકરં નિજમાયયેદં
નાનેવ તૈરવસિતસ્તદનુપ્રવિષ્ટઃ ॥ ૨૩॥

ત્વં વા ઇદં સદસદીશ ભવાંસ્તતોઽન્યો
માયા યદાત્મપરબુદ્ધિરિયં હ્યપાર્થા ।
યદ્યસ્ય જન્મ નિધનં સ્થિતિરીક્ષણં ચ
તદ્વૈ તદેવ વસુકાલવદષ્ટિતર્વોઃ ॥ ૨૪॥

ન્યસ્યેદમાત્મનિ જગદ્વિલયામ્બુમધ્યે
શેષેઽઽત્મના નિજસુખાનુભવો નિરીહઃ ।
યોગેન મીલિતદૃગાત્મનિપીતનિદ્ર-
સ્તુર્યે સ્થતો ન તુ તમો ન ગુણાંશ્ચ યુઙ્ક્ષે ॥ ૨૫॥

તસ્યૈવ તે વપુરિદં નિજકાલશક્ત્યા
સઞ્ચોદિતપ્રકૃતિધર્મણ આત્મગૂઢમ્ ।
અમ્ભસ્યનન્તશયનાદ્વિરમત્સમાધે-
ર્નાભેરભૂત્ સ્વકણિકાવટવન્મહાબ્જમ્ ॥ ૨૬॥

તત્સમ્ભવઃ કવિરતોઽન્યદપશ્યમાન-
સ્ત્વાં બીજમાત્મનિ તતં સ્વબહિર્વિચિન્ત્ય ।
નાવિન્દદબ્દશતમપ્સુ નિમજ્જમાનો
જાતેઽઙ્કુરે કથમુ હોપલભેત બીજમ્ ॥ ૨૭॥

સ ત્વાત્મયોનિરતિવિસ્મત આસ્થિતોઽબ્જં
કાલેન તીવ્રતપસા પરિશુદ્ધભાવઃ ।
ત્વામાત્મનીશ ભુવિ ગન્ધમિવાતિસૂક્ષ્મં

ભૂતેન્દ્રિયાશયમયે વિતતં દદર્શ ॥ ૨૮॥

એવં સહસ્રવદનાઙ્ઘ્રિશિરઃ કરોરુ-
નાસાસ્યકર્ણનયનાભરણાયુધાઢ્યમ્ ।
માયામયં સદુપલક્ષિતસન્નિવેશં
દૃષ્ટ્વા મહાપુરુષમાપ મુદં વિરિઞ્ચઃ ॥ ૨૯॥

તસ્મૈ ભવાન્હયશિરસ્તનુવં ચ બિભ્રદ્-
વેદદ્રુહાવતિબલૌ મધુકૈટભાખ્યૌ ।
હત્વાઽઽનયચ્છ્રુતિગણાંસ્તુ રજસ્તમશ્ચ
સત્ત્વં તવ પ્રિયતમાં તનુમામનન્તિ ॥ ૩૦॥

ઇત્થં નૃતિર્યગૃષિદેવઝષાવતારૈ-
ર્લોકાન્ વિભાવયસિ હંસિ જગત્પ્રતીપાન્ ।
ધર્મં મહાપુરુષ પાસિ યુગાનુવૃત્તં
છન્નઃ કલૌ યદભવસ્ત્રિયુગોઽથ સ ત્વમ્ ॥ ૩૧॥

નૈતન્મનસ્તવ કથાસુ વિકુણ્ઠનાથ
સમ્પ્રીયતે દુરિતદુષ્ટમસાધુ તીવ્રમ્ ।
કામાતુરં હર્ષશોકભયૈષણાર્તં
તસ્મિન્કથં તવ ગતિં વિમૃશામિ દીનઃ ॥ ૩૨॥

જિહ્વૈકતોઽચ્યુત વિકર્ષતિ માવિતૃપ્તા
શિશ્નોઽન્યતસ્ત્વગુદરં શ્રવણં કુતશ્ચિત્ ।
ઘ્રાણોઽન્યતશ્ચપલદૃક્ ક્વ ચ કર્મશક્તિ-
ર્બહ્વ્યઃ સપત્ન્ય ઇવ ગેહપતિં લુનન્તિ ॥ ૩૩॥

એવં સ્વકર્મપતિતં ભવવૈતરણ્યા-
મન્યોન્યજન્મમરણાશનભીતભીતમ્ ।
પશ્યઞ્જનં સ્વપરવિગ્રહવૈરમૈત્રં
હન્તેતિ પારચર પીપૃહિ મૂઢમદ્ય ॥ ૩૪॥

કો ન્વત્ર તેઽખિલગુરો ભગવન્પ્રયાસ
ઉત્તારણેઽસ્ય ભવસમ્ભવલોપહેતોઃ ।
મૂઢેષુ વૈ મહદનુગ્રહ આર્તબન્ધો
કિં તેન તે પ્રિયજનાનનુસેવતાં નઃ ॥ ૩૫॥

નૈવોદ્વિજે પર દુરત્યયવૈતરણ્યા-
સ્ત્વદ્વીર્યગાયનમહામૃતમગ્નચિત્તઃ ।
શોચે તતો વિમુખચેતસ ઇન્દ્રિયાર્થ-
માયાસુખાય ભરમુદ્વહતો વિમૂઢાન્ ॥ ૩૬॥

પ્રાયેણ દેવ મુનયઃ સ્વવિમુક્તિકામા
મૌનં ચરન્તિ વિજને ન પરાર્થનિષ્ઠાઃ ।
નૈતાન્વિહાય કૃપણાન્વિમુમુક્ષ એકો
નાન્યં ત્વદસ્ય શરણં ભ્રમતોઽનુપશ્યે ॥ ૩૭॥

યન્મૈથુનાદિ ગૃહમેધિસુખં હિ તુચ્છં
કણ્ડૂયનેન કરયોરિવ દુઃખદુઃખમ્ ।
તૃપ્યન્તિ નેહ કૃપણા બહુદુઃખભાજઃ
કણ્ડૂતિવન્મનસિજં વિષહેત ધીરઃ ॥ ૩૮॥

મૌનવ્રતશ્રુતતપોઽધ્યયનસ્વધર્મ-
વ્યાખ્યારહોજપસમાધય આપવર્ગ્યાઃ ।
પ્રાયઃ પરં પુરુષ તે ત્વજિતેન્દ્રિયાણાં
વાર્તા ભવન્ત્યુત ન વાત્ર તુ દામ્ભિકાનામ્ ॥ ૩૯॥

રૂપે ઇમે સદસતી તવ વેદસૃષ્ટે
બીજાઙ્કુરાવિવ ન ચાન્યદરૂપકસ્ય ।
યુક્તાઃ સમક્ષમુભયત્ર વિચિન્વતે ત્વાં
યોગેન વહ્નિમિવ દારુષુ નાન્યતઃ સ્યાત્ ॥ ૪૦॥

ત્વં વાયુરગ્નિરવનિર્વિયદમ્બુમાત્રાઃ
પ્રાણેન્દ્રિયાણિ હૃદયં ચિદનુગ્રહશ્ચ ।
સર્વં ત્વમેવ સગુણો વિગુણશ્ચ ભૂમન્
નાન્યત્ ત્વદસ્ત્યપિ મનોવચસા નિરુક્તમ્ ॥ ૪૧॥

નૈતે ગુણા ન ગુણિનો મહદાદયો યે
સર્વે મનઃપ્રભૃતયઃ સહદેવમર્ત્યાઃ ।
આદ્યન્તવન્ત ઉરુગાય વિદન્તિ હિ ત્વા-
મેવં વિમૃશ્ય સુધિયો વિરમન્તિ શબ્દાત્ ॥ ૪૨॥

તત્તેઽર્હત્તમ નમઃસ્તુતિકર્મપૂજાઃ
કર્મ સ્મૃતિશ્ચરણયોઃ શ્રવણં કથાયામ્ ।

સંસેવયા ત્વયિ વિનેતિ ષડઙ્ગયા કિં
ભક્તિં જનઃ પરમહંસગતૌ લભેત ॥ ૪૩॥

ઇતિ પ્રહ્લાદકૃતા શ્રીનરસિંહસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Narasimhastutihprahlada*

pdf was typeset on May 13, 2018

Please send corrections to *sanskrit@cheerful.com*